# shrIdaNDAyudhapANisvAmI suprabhAtam

# શ્રીદણ્ડાયુધપાણિસ્વામી સુપ્રભાતમ્

## Document Information

Text title : daNDAyudhapANisvAmIsuprabhAtam

File name : daNDAyudhapANisvAmIsuprabhAtam.itx

Category : subrahmanya, suprabhAta

Location : doc_subrahmanya

Author : Sri KS Balasubrahmanya Sivachariyar from Pazhani, TN

Latest update : October 10, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીદણ્ડાયુધપાણિસ્વામી સુપ્રભાતમ્

ઉત્તિષ્ઠોત્તિષ્ઠ ગાઙ્ગેય ઉત્તિષ્ઠ શિખિવાહન ।
ઉત્તિષ્ઠ કરુણાસિન્ધો ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૧॥

શ્રીપાર્વતીવદનપદ્મદિવાકર શ્રીશમ્ભોર્લલાટનયનોદ્ભવ રક્તવર્ણ ।
શ્રીહંસવાહન જનાર્દનવન્દનીય શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૨॥

શ્રીપઞ્ચવક્ત્રપરમેશ્વરવામભાગાઽલઙ્કારયોષિદવલમ્બનપૂર્ણરૂપ ।
ગઙ્ગાસુતપ્રિય વરપ્રદ દાનશીલ શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૩॥

બાલાર્કભાસ પવનાસન બાહુલેય ધાતુસ્સ્વદર્પહર તારકદૈત્યહારિન્ ।
ૐકારસારપરમેશ્વરબોધનીય શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૪॥

જ્ઞાનાર્ણવાભિધ શિવોદ્ભવપૂર્ણચન્દ્ર જ્ઞાનપ્રભાભિરભિભાસિતલોકમૂર્તે ।
શ્રીચૂતમુક્તફલમામ્રુમિતસ્થિતોઽસિ શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૫॥

બાલેન્દુમૌલિપરમેશ્વરપૂજકસ્ય પદ્માસુરસ્ય મલપાશવિમોચનાય ।
કલ્યાણદાનકરુણાર્ણવપૂર્ણરૂપ શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૬॥

લક્ષ્મીનિવાસનયનોદ્ભવકન્યકાભ્યાં વલ્લી મહેન્દ્રતનયાપરિશોભનાઙ્ગ ।
શ્રીમચ્છિવે ગિરિવરેઽપિ વિરાજમાન શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૭॥

કન્દર્પદર્પહર સુન્દર દિવ્યમૂર્તે મન્દારમુખ્યબહુપુષ્પસુપૂજિતાઙ્ઘ્રે ।
મન્દસ્મિતેન પરિપૂર્ણકૃપાપ્રદાન શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૮॥

સિન્દૂરવર્ણ શિવભસ્મવિલેપિતાઙ્ગ દિવ્યૈર્વિચિત્રનવરત્નસુવર્ષિતાઙ્ઘ્રે । સુભૂષિતાઙ્ઘ્રે
કૌપીનદણ્ટધરહસ્તવિરાજમાન શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૯॥

પાદારવિન્દપતિતં નિજભક્તમસ્મિન્ લોકત્રયેઽપિ પરિપૂજિતપીઠવેશિન્ ।
ધર્માર્થકામપુરુષાર્થફલપ્રદાન શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૧૦॥

ૐકારરૂપ પરિદિવ્યવિલાસમૂર્તે ચન્દ્રાર્ધરોધિપરિનાદતદન્તરૂપ ।
શક્તેર્વિયાપિનિ પરે સમનોન્મનાન્ત શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૧૧॥

પ્રાતર્નિદર્શસમયે નિજબાલરૂપ મધ્યાહ્ન વિપ્રજનવેષસુરૂપધારિન્ ।
સાયહ્ન રાજધૃતવેષ સુયોગિ રાત્રૌ શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૧૨॥

કાલત્રયેઽપિ તનુતાં કરુણાભિવૃષ્ટ લોકત્રયેઽપિ વિનુત ત્રિદશૈશ્ચ નિત્યમ્ ।
તત્ત્વત્રયોપરિનિવિષ્ટવિભૂતિદેય શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૧૩॥

ભક્તાગ્રભૂતમરુણાચલનામધેયં મુક્તાદ્યનેકવિવિધસ્તુવિતં દયાલો ।
બદ્ધાત્મસૌખ્યવરદત્ત મહાપ્રભો મે શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૧૪॥

વિશ્વાર્તિભઞ્જન વિશાલસુલોચન શ્રીકોણં કુરુષ્વ કૃપયા પતિતાય મહ્યમ્ ।
લોકોદ્ધરાય પરમાદ્ભુતભૂરિમૂર્તે શ્રીસુપ્રભાતમધુના કુરુ દણ્ડપાણે ॥ ૯૫॥

વિના દણ્ડપાણિં ન નાથો ન નાથસ્સદા દણ્ડપાણિં સ્મરામિ સ્મરામિ ।
પ્રભો દણ્ડપાણે પ્રસીદ પ્રસીદ પ્રિયં દણ્ડપાણે પ્રયચ્છ પ્રયચ્છ ॥ ૧૬॥

અહં ત્વા દિનાદૌ નમસ્કૃત્ય નિત્યં તવૈવાશ્રિતસ્સર્વકાર્યં કરોમિ ।
ત્વમેવાસિ મામુદ્ધરાય પ્રવૃત્તસ્ત્વમેવાસિ સર્વં સુકર્તું ચ ભોક્તુમ્ ॥ ૧૭॥

ગિરૌ સન્નિવિષ્ટસ્સુરેશાનપુત્રસ્સદા દણ્ડહસ્તશ્ચિદાનન્દગાત્ર ।
મુદા રાજવેષઃ પરાનન્દહાસસ્સ નઃ પાતુ દેવો ગુહો બાલરૂપઃ ॥ ૧૮॥

શુભં રક્તવર્ણં શિવં શમ્ભુસૂનું કરામ્ભોજયુગ્માન્વિતં પઙ્કજસ્થમ્ ।
શિવાનન્દસન્દોહબદ્ધં પ્રપદ્યે ભવામ્બોધિપારં ગુહં ષણ્મુખાખ્યમ્ ॥ ૧૯॥

હરિબ્રહ્મદેવેન્દ્રવન્દ્યં સુરેશં નિધિવૃન્દસંસેવિતસ્યાત્મજાપમ્ ।
ગુરું ગ્રામપાલપ્રિયં તારકારિં ભજે ભુક્તિમુક્તિપ્રદં ભીતિનાશમ્ ॥ ૨૦॥

ગિરિજાકરપલ્લવ સલ્લલિતં ગિરિજોદ્ભવમૂલસુવિગ્રહગમ્ ।
ગુરુમૂર્તિમનન્તવરં દદતં કરુણાજલધિં ભજ દણ્ડધરમ્ ॥ ૨૧॥

શિવભોગસમુદ્ભવકીર્તિધરં શુભયોગવરપ્રદમૂર્તિવરમ્ ।
પરિપાલિતધર્મકુલં વરદં કરુણાજલધિં ભજ દણ્ડધરમ્ ॥ ૨૨॥

પ્રણવાન્તરનાદકલાદિવરં પ્રણતાર્તિહરં પ્રણતાં વિહિતમ્ ।
ફલદં બલદં વરસન્નિહિતં કરુણાજલધિં ભજ દણ્ડધરમ્ ॥ ૨૩॥

વિધિવદ્વિનુતૈર્વિધિવદ્વિનુતં વિવિધા વિનુતૈર્વિવિધા વિનુતમ્ ।
પરિતુલ્યફલપ્રદતં કરુણાજલધિં ભજ દણ્ડધરમ્ ॥ ૨૪॥

સ્તવરાજશિવાર્ચિતપાદયુગં સ્તુતિરાજસુકીર્તનવાક્યગતમ્ ।
નિજબાલકુટુમ્બસુપાલવરં કરુણાજલધિં ભજ દણ્ડધરમ્ ॥ ૨૫॥

કલ્પવૃક્ષાય નમતાં કરુણાસગરાય ચ ।
કૌપીનદણ્ડહસ્તાય કન્દર્પાયુતભાસિને ॥ ૨૬॥

ઈતિભીતિનિવારાય ચાન્ધકારનિરોધિને ।
જ્ઞાનપ્રદાય શાન્તાય શ્રીસ્કન્દગુરવે નમઃ ॥ ૨૭॥

સ્વામિને કામિનાં કામપૂરણાય કલૌ યુગે ।
વરદામલકારણ્યવાસમાનાય મઙ્ગલમ્ ॥ ૨૮॥

પરિપૂર્ણતનુસ્થાય કદમ્બવનવાસિને ।
પળણીગિરિવાસાય ભાસમાનાય મઙ્ગલમ્ ॥ ૨૯॥

ભાગ્યપ્રદાય તે બાલસુબ્રહ્મણ્યનુતાય ચ ।
ભૂરિભોગપ્રદાનાય ભોગપૂજ્યાય મઙ્ગલમ્ ॥ ૩૦॥

વરદાનકરાબ્જાય વાસિને શિવપર્વતે ।
ભયપીડિતભક્તૈશ્ચ વન્દિતાયાસ્તુ મઙ્ગલમ્ ॥ ૩૧॥

સર્વમઙ્ગલરૂપાય સર્વમઙ્ગલકારિણે ।
જ્ઞાનમઙ્ગલરૂપાય જ્ઞાનસ્કન્દાય મઙ્ગલમ્ ॥ ૩૨॥

Composition of Sri KS Balasubrahmanya Sivachariyar from Pazhani, TN on Lord Subrahmanya

Encoded by Shree Devi Kumar.
Proofread by Shree Devi Kumar, PSA Easwaran

*shrIdaNDAyudhapANisvAmI suprabhAtam*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*